श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ समर्पणपद्धतिः चतुर्थी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ समर्पणपद्धतिः चतुर्थी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

भजामः पादुके ! याभ्यां भरतस्याग्रजस्तदा।
प्रायः प्रतिप्रयाणाय प्रास्थानिकमकल्पयत्॥ ४.१ ॥

राज्यं विहाय रघुवंशमहीपतीनां
    पौरांश्च पादरसिकान् पृथिवीं च रक्ताम्।
त्वामेव हन्त चरणावनि ! सम्प्रयास्यन्
    आलम्बत प्रथममुत्तरकोसलेन्द्रः॥ ४.२ ॥

प्राप्ते प्रयाणसमये मणिपादरक्षे !
    पौरानवेक्ष्य भवती करुणप्रलापान्।
मञ्जुप्रणादमुखरा विनिवर्तनार्थं
    रामं पदग्रहणपूर्वमयाचतेव॥ ४.३ ॥

मत्वा तृणाय भरतो मणिपादरक्षे !
    रामेण तां विरहितां रघुराजधानीम्।
त्वामेव सप्रणयमुज्जयिनीमवन्तीम्
    मेने महोदयमयीं मधुरामयोध्याम्॥ ४.४ ॥

रामात्मनः प्रतिपदं मणिपादरक्षे !
    विश्वम्भरस्य वहनेन परीक्षितां त्वाम्।
विश्वस्य देवि वहने विनिवेशयिष्यन्
    विस्रब्ध एव भरतो भवतीम् ययाचे॥ ४.५ ॥

भक्त्या परं भवतु तद् भरतस्य साधोः
    त्वत्प्रार्थनं रघुपतौ मणिपादरक्षे !।

केनाशयेन स मुनिः परमार्थदर्शी
भद्राय देवि ! जगतां भवतीमवादीत्॥ ४.६ ॥

रामे वनं व्रजति पङ्क्तिरथे प्रसुप्ते
राज्यापवादचकिते भरते तदानीम्।
आश्वासयेत् क इव कोसलवासिनस्तान्
सीतेव चेत् त्वमपि साहसवृत्तिरासीः॥ ४.७ ॥

पादावनि ! प्रभवतो जगतां त्रयाणां
रामादपि त्वमधिका नियतं प्रभावात्।
नो चेत् कथन्नु भरतस्य तमेव लिप्सोः
प्रत्यायनं परिपणं भवती भवित्री॥ ४.८ ॥

मन्ये नियुज्य भवतीं मणिपादरक्षे !
पार्ष्णिग्रहस्य भरतस्य निवारणार्थम्।
रत्नाकरं सपदि गोष्पदयन् विजिग्ये
रामः क्षणेन रजनीचरराजधानीम्॥ ४.९ ॥

पादावनि ! प्रभुतरानपराधवर्गान्
सोढुम् क्षमा त्वमसि मूर्तिमती क्षमैव।
यत् त्वां विहाय निहताः परिपन्थिनस्ते
देवेन दाशरथिना दशकण्ठमुख्याः॥ ४.१० ॥

वाक्ये गरीयसि पितुर्विहितेऽप्यतृप्त्या
मातुर्मनोरथमशेषमवन्ध्ययिष्यन्।
मन्ये तदा रघुपतिः भरतस्य तेने
मातस्त्वयैव मणिमौलिनिवेशलक्ष्मीम्॥ ४.११ ॥

पादाम्बुजाद्विगलितां परमस्य पुंसः
त्वामादरेण विनिवेश्य जटाकलापे।
अङ्गीचकार भरतो मणिपादरक्षे !
गङ्गाधिरूढशिरसो गिरिशस्य कान्तिम्॥ ४.१२ ॥

अविकलमधिकर्तुं रक्षणे सप्तलोक्याः
    रघुपतिचरणेन न्यस्तदिव्यानुभावाम्।
अभजत भरतस्त्वामञ्जसा पादरक्षे !
    मणिमकुटनिवेशत्यागधन्येन मूर्ध्ना॥ ४.१३ ॥

इयमविकलयोगक्षेमसिद्ध्यै प्रजानाम्
    अलमिति भरतेन प्रार्थितामादरेण।
रघुपतिरधिरोहन् अभ्यषिञ्चत् स्वयं त्वां
    चरणनखमणीनां चन्द्रिकानिर्झरेण॥ ४.१४ ॥

प्रणयिनि पदपद्मे गाढमाश्लिष्यति त्वां
    विधिसुतकथितं तद्वैभवं ते विदन्तः।
अनुदिनमृषयस्त्वामर्चयन्त्यग्न्यगारे
    रघुपतिपदरक्षे ! रामगिर्याश्रमस्थाः॥ ४.१५ ॥

नियतमधिरुरोह त्वामनाधेयशक्तिं
    निजचरणसरोजे शक्तिमाधातुकामः।
स कथमितरथा त्वां न्यस्य रामो विजह्रे
    दृषदुपचितभूमौ दण्डकारण्यभागे॥ ४.१६ ॥

रघुपतिपदपद्माद्रत्नपीठे निवेष्टुम्
    भरतशिरसि लग्नां प्रेक्ष्य पादावनि ! त्वाम्।
परिणतपुरुषार्थः पौरवर्गः स्वयं ते
    विधिमभजत सर्वो वन्दिवैतालिकानाम्॥ ४.१७ ॥

अनन्यराजन्यनिदेशनिष्ठां चकार पृथ्वीं चतुरर्णवान्ताम्।
भ्रातुर्यियासोः भरतस्तदा त्वां मूर्ध्ना वहन् मूर्तिमतीमिवाज्ञाम्॥ ४.१८ ॥

यद् भ्रात्रे भरताय रङ्गपतिना रामत्वमातस्थुषा
    नित्योपास्यनिजाङ्घ्रिनिष्क्रयतया निश्चित्य विश्राणितम्।
योगक्षेमवहं समस्तजगतां यद्गीयते योगिभिः
    पादत्राणमिदं मितम्पचकथामह्नाय मे निह्नुताम्॥ ४.१९ ॥

भरतस्येव ममापि प्रशमित विश्वापवाददुर्जाता।
शेषेव शिरसि नित्यं विहरतु रघुवीरपादुके ! भवती॥ ४.२० ॥

॥ इति श्रीपादुकासहस्रे समर्पणपद्धतिः चतुर्थी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥